[1]पुमनुजा-रामानुजः, [2]पुंसाऽनुजः, [3]अजः-द्विजः,[A] ब्राह्मणजः, क्षत्रियजः-नगजः[B]-[C]वनजः, कौसल्याजः,[D] अभिजः-परिजः [केशः], जनः, जिजनिषुः, जञ्जनः-[4]जाजः ;

जनितव्यम्, जनयितव्यम्, जिजनिषितव्यम्, जञ्जनितव्यम्-जाजायितव्यम् ;

जननीयम्, जननीयम्, जिजनिषणीयम्, जञ्जननीयम्-जाजायनीयम् ;

[5]जन्यम्,[E] जन्यम्, जिजनिष्यम्, जञ्जन्यम्-जाजाय्यम् ;

ईषज्जनः-दुर्जनः-सुजनः ; — — —

जन्यमानः-जायमानः, जन्यमानः, जिजनिष्यमाणः, जञ्जन्यमानः-जाजाय्यमानः ;

---

1. 'अनौ कर्मणि' (3-2-100) इति डप्रत्ययः।
2. 'पुंसाऽनुजो जनुषाऽन्ध इति वक्तव्यम्' (वा. 6-3-3) इति तृतीयाया अलुक्।
3. 'अन्येष्वपि दृश्यते' (3-2-101) इति डप्रत्ययः। "—'सप्तम्याम्—' (3-2-97) इत्युक्तम्; असप्तम्यामपि दृश्यते—न जायते इत्यजः। द्विर्जाताः द्विजाः। 'पञ्चम्यामजातौ' (3-2-98) इत्युक्तम्; जातावपि दृश्यते—ब्राह्मणजो धर्मः, क्षत्रियजं युद्धम्। 'उपसर्गे च संज्ञायाम्' (3-2-99) इत्युक्तम्; असंज्ञायामपि दृश्यते—अभिजाः, परिजाः केशाः। 'अनौ कर्मणि' (3-2-100) इत्युक्तम्; अकर्मण्यपि दृश्यते—अनुजातः=अनुजः। अपिशब्दः सर्वोपाधिव्यभिचारार्थः। तेन धात्वन्तरादपि भवति, कारकान्तरेऽपि—परितः खाता=परिखा, आखा।" इति काशिका (3-2-101) अत्रानुसन्धेया।
4. यङन्तात् पचाद्यचि (3-1-134) पृथगल्लोपे, अकारस्य स्थानिवद्भावात् उत्तरखण्डाकारस्य लोपः।
5. 'तकिशसिचतिजनिभ्यो यद्वाच्यः' (वा. 3-1-97) इति ण्यदपवादो यत्।

A. 'वेदिवत् सपरिग्राहा यज्ञियैः संस्कृता द्विजैः।' भ. का. 7-45.

B. 'न गजा नगजा दयिता दयिता विगतं विगतं वलितम् वलितम्।
प्रमदाप्रमदा महता महतामरणं मरणं समयात् समयात्॥' भ. का. 10-9.

C. 'घनगिरीन्द्रविलङ्घनशालिना वनगता वनजद्युतिलोचना।
जनमता ददृशे जनकात्मजा तरुमृगेण तरुस्थलशायिनी॥' भ. का. 10. 15.

D. 'पञ्च पञ्चनखा भक्ष्या ये प्रोक्ताः कृतजैर्द्विजैः।
कौसल्याज शशादीनां तेषां नैकोऽप्यहं कपिः॥' भ. का. 6-134.

E. 'स प्रोषिवानेत्य पुरं प्रवेक्ष्यन् शुश्राव घोषं न जनौघजन्यम्।' भ. का. 3.27.